# ॥ वाल्मीकि रामायण॥

## ७ उत्तरकाण्ड

## अध्याय ६०

कथां कथयतां तेषां जयं चाकाङ्क्षतां शुभम् ।
व्यतीता रजनी शीघ्रं शत्रुघ्नस्य महात्मनः ॥ १॥

ततः प्रभाते विमले तस्मिन्काले स राक्षसः ।
निर्गतस्तु पुराद्वीरो भक्षाहारप्रचोदितः ॥ २॥

एतस्मिन्नन्तरे शूरः शत्रुघ्नो यमुनां नदीम् ।
तीर्त्वा मधुपुरद्वारि धनुष्पाणिरतिष्ठत ॥ ३॥

ततोऽर्धदिवसे प्राप्ते क्रूरकर्मा स राक्षसः ।
आगच्छद्बहुसहस्रं प्राणिनाम् उद्वहन्भरम् ॥ ४॥

ततो ददर्श शत्रुघ्नं स्थितं द्वारि धृतायुधम् ।
तमुवाच ततो रक्षः किमनेन करिष्यसि ॥ ५॥

ईदृशानां सहस्राणि सायुधानां नराधम ।
भक्षितानि मया रोषात्कालमाकाङ्क्षसे नु किम् ॥ ६॥

आहारश्चाप्यसम्पूर्णो ममायं पुरुषाधम ।
स्वयं प्रविष्टो नु मुखं कथमासाद्य दुर्मते ॥ ७॥

तस्यैवं भाषमाणस्य हसतश्च मुहुर्मुहुः ।
शत्रुघ्नो वीर्यसम्पन्नो रोषादश्रूण्यवर्तयत् ॥ ८॥

तस्य रोषाभिभूतस्य शत्रुघ्नस्य महात्मनः ।
तेजोमया मरीच्यस्तु सर्वगात्रैर्विनिष्पतन् ॥ ९॥

उवाच च सुसङ्क्रुद्धः शत्रुघ्नस्तं निशाचरम् ।
योद्धुमिच्छामि दुर्बुद्धे द्वन्द्वयुद्धं त्वया सह ॥ १०॥

पुत्रो दशरथस्याहं भ्राता रामस्य धीमतः ।
शत्रुघ्नो नाम शत्रुघ्नो वधाकाङ्क्षी तवागतः ॥ ११॥

तस्य मे युद्धकामस्य द्वन्द्वयुद्धं प्रदीयताम् ।
शत्रुस्त्वं सर्वजीवानां न मे जीवन्गमिष्यसि ॥ १२॥

तस्मिंस्तथा ब्रुवाणे तु राक्षसः प्रहसन्निव ।
प्रत्युवाच नरश्रेष्ठं दिष्ट्या प्राप्तोऽसि दुर्मते ॥ १३॥

मम मातृष्वसुर्भ्राता रावणो नाम राक्षसः ।
हतो रामेण दुर्बुद्धे स्त्रीहेतोः पुरुषाधम ॥ १४॥

तच्च सर्वं मया क्षान्तं रावणस्या कुलक्षयम् ।
अवज्ञां पुरतः कृत्वा मया यूयं विशेषतः ॥ १५॥

न हताश्च हि मे सर्वे परिभूतास्तृणं यथा ।
भूताश्चैव भविष्याश्च यूयं च पुरुषाधमाः ॥ १६॥

तस्य ते युद्धकामस्या युद्धं दास्यामि दुर्मते ।
ईप्सितं यादृशं तुभ्यं सज्जये यावदायुधम् ॥ १७॥

तमुवाचाथ शत्रुघ्न क्व मे जीवन्गमिष्यसि ।
दुर्बलोऽप्यागतः शत्रुर्न मोक्तव्यः कृतात्मना ॥ १८॥

यो हि विक्लवया बुद्ध्या प्रसरं शत्रवे ददौ ।
स हतो मन्दबुद्धित्वाद्यथा कापुरुषस्तथा ॥ १९॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 26, 1998; Send corrections to sanskrit@cheerful.com